# Vishnvadikritam Shiva Stotram

# વિષ્ણ્વાદિકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Vishnvadikritam Shiva Stotram

File name : viShNvAdikRRitaMshivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | satIkhaNDa | adhyAya 41/1-47||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 19, 2024

*sanskritdocuments.org*

# વિષ્ણ્વાદિકૃતં શિવસ્તોત્રમ્

વિષ્ણ્વાદય ઊચુઃ ।
દેવદેવ મહાદેવ લૌકિકાચારકૃત્પ્રભો ।
બ્રહ્મ ત્વામીશ્વરં શમ્ભું જાનીમઃ કૃપયા તવ ॥ ૧॥

કિં મોહયસિ નસ્તાત માયયા પરયા તવ ।
દુર્જ્ઞેયયા સદા પુંસાં મોહિન્યા પરમેશ્વર ॥ ૨॥

પ્રકૃતઃ પુરુષસ્યાપિ જગતો યોનિબીજયોઃ ।
પરબ્રહ્મ પરસ્ત્વં ચ મનોવાચામગોચરઃ ॥ ૩॥

ત્વમેવ વિશ્વં સૃજસિ પાસ્યત્સિ નિજતન્ત્રતઃ ।
સ્વરૂપાં શિવશક્તિં હિ ક્રીડન્નૂર્ણપટો યથા ॥ ૪॥

ત્વમેવ ક્રતુમીશાન સસર્જિથ દયાપરઃ ।
દક્ષેણ સૂત્રેણ વિભો સદા ત્રય્યભિપત્તયે ॥ ૫॥

ત્વયૈવ લોકેઽવસિતાસ્સેતવો યાન્ ધૃતવ્રતાઃ ।
શુદ્ધાન્ શ્રદ્દધતે વિપ્રા વેદમાર્ગવિચક્ષણાઃ ॥ ૬॥

કર્તુસ્ત્વં મઙ્ગલાનાં હિ સ્વપરં તુ મુખે વિભો ।
અમઙ્ગલાનાં ચ હિતં મિશ્રં વાથ વિપર્યયમ્ ॥ ૭॥

સર્વકર્મફલાનાં હિ સદા દાતા ત્વમેવ હિ ।
સર્વે હિ પ્રોક્તા હિ યશસ્તત્પતિસ્ત્વં શ્રુતિશ્રુતઃ ॥ ૮॥

પૃથગ્ધિયઃ કર્મદૃશોઽરુન્તુદાશ્ચ દુરાશયાઃ ।
વિતુદન્તિ પરાન્મૂઢા દુરુક્તૈર્મત્સરાન્વિતાઃ ॥ ૯॥

તેષાં દૈવવધાનાં ભો ભૂયાત્ત્વચ્ચ વધો વિભો ।
ભગવન્પરમેશાન કૃપાં કુરુ પરપ્રભો ॥ ૨.૪૧.૧૦॥

નમો રુદ્રાય શાન્તાય બ્રહ્મણે પરમાત્મને ।

કપર્દિને મહેશાય જ્યોત્સ્નાયૈ મહતે નમઃ ॥ ૧૧॥

ત્વં હિ વિશ્વસૃજાં સ્રષ્ટા ધાતા ત્વં પ્રપિતામહઃ ।
ત્રિગુણાત્મા નિર્ગુણશ્ચ પ્રકૃતેઃ પુરુષાત્પરઃ ॥ ૧૨॥

નમસ્તે નીલકણ્ઠાય વેધસે પરમાત્મને ।
વિશ્વાય વિશ્વબીજાય જગદાનન્દહેતવે ॥ ૧૩॥

ૐ કારસ્ત્વં વષટ્કારસ્સર્વારમ્ભપ્રવર્તકઃ ।
હન્તકાસ્સ્વધાકારો હવ્યકવ્યાન્નભુક્ સદા ॥ ૧૪॥

કૃતઃ કથં યજ્ઞભઙ્ગસ્ત્વયા ધર્મપરાયણ ।
બ્રહ્મણ્યસ્ત્વં મહાદેવ કથં યજ્ઞહનો વિભો ॥ ૧૫॥

બ્રાહ્મણાનાં ગવાં ચૈવ ધર્મસ્ય પ્રતિપાલકઃ ।
શરણ્યોઽસિ સદાનન્ત્યઃ સર્વેષાં પ્રાણિનાં પ્રભો ॥ ૧૬॥

નમસ્તે ભગવન્ રુદ્ર ભાસ્કરામિતતેજસે ।
નમો ભવાય દેવાય રસાયામ્બુમયાય તે ॥ ૧૭॥

શર્વાય ક્ષિતિરૂપાય સદા સુરભિણે નમઃ ।
રુદ્રાયાગ્નિસ્વરૂપાય મહાતેજસ્વિને નમઃ ॥ ૧૮॥

ઈશાય વાયવે તુભ્યં સંસ્પર્શાય નમો નમઃ ।
પશૂનામ્પતયે તુભ્યં યજમાનાય વેધસે ॥ ૧૯॥

ભીમાય વ્યોમરૂપાય શબ્દમાત્રાય તે નમઃ ।
મહાદેવાય સોમાય પ્રવૃત્તાય નમોઽસ્તુ તે ॥ ૨.૪૧.૨૦॥

ઉગ્રાય સૂર્યરૂપાય નમસ્તે કર્મયોગિને ।
નમસ્તે કાલકાલાય નમસ્તે રુદ્ર મન્યવે ॥ ૨૧॥

નમશ્શિવાય ભીમાય શઙ્કરાય શિવાય તે ।
ઉગ્રોઽસિ સર્વભૂતાનાં નિયન્તા યચ્છિવોઽસિ નઃ ॥ ૨૨॥

મયસ્કરાય વિશ્વાય બ્રહ્મણે હ્યાર્તિનાશિને ।
અમ્બિકાપતયે તુભ્યમુમાયાઃ પતયે નમઃ ॥ ૨૩॥

શર્વાય સર્વરૂપાય પુરુષાય પરાત્મને ।
સદસદ્વ્યક્તિહીનાય મહતઃ કારણાય તે ॥ ૨૪॥

જાતાય બહુધા લોકે પ્રભૂતાય નમો નમઃ ।
નીલાય નીલરુદ્રાય કદ્રુદ્રાય પ્રચેતસે ॥ ૨૫॥

મીઢુષ્ટમાય દેવાય શિપિવિષ્ટાય તે નમઃ ।
મહીયસે નમસ્તુભ્યં હન્ત્રે દેવારિણાં સદા ॥ ૨૬॥

તારાય ચ સુતારાય તરુણાય સુતેજસે ।
હરિકેશાય દેવાય મહેશાય નમો નમઃ ॥ ૨૭॥

દેવાનાં શમ્ભવે તુભ્યં વિભવે પરમાત્મને ।
પરમાય નમસ્તુભ્યં કાલકણ્ઠાય તે નમઃ ॥ ૨૮॥

હિરણ્યાય પરેશાય હિરણ્યવપુષે નમઃ ।
ભીમાય ભીમરૂપાય ભીમકર્મરતાય ચ ॥ ૨૯॥

ભસ્મદિગ્ધશરીરાય રુદ્રાક્ષાભરણાય ચ ।
નમો હ્રસ્વાય દીર્ઘાય વામનાય નમોઽસ્તુ તે ॥ ૨.૪૧.૩૦॥

દૂરેવધાય તે દેવાગ્રેવધાય નમો નમઃ ।
ધન્વિને શૂલિને તુભ્યં ગદિને હલિને નમઃ ॥ ૩૧॥

નાનાયુધધરાયૈવ દૈત્યદાનવનાશિને ।
સદ્યાય સદ્યરૂપાય સદ્યોજાતાય વૈ નમઃ ॥ ૩૨॥

વામાય વામરૂપાય વામનેત્રાય તે નમઃ ।
અઘોરાય પરેશાય વિકટાય નમો નમઃ ॥ ૩૩॥

તત્પુરુષાય નાથાય પુરાણપુરુષાય ચ ।
પુરુષાર્થપ્રદાનાય વ્રતિને પરમેષ્ઠિને ॥ ૩૪॥

ઈશાનાય નમસ્તુભ્યમીશ્વરાય નમો નમઃ ।
બ્રહ્મણે બ્રહ્મરૂપાય નમસ્સાક્ષાત્પરાત્મને ॥ ૩૫॥

ઉગ્રોઽસિ સર્વદુષ્ટાનાં નિયન્તાસિ શિવોઽસિ નઃ ।
કાલકૂટાશિને તુભ્યં દેવાદ્યવનકારિણે ॥ ૩૬॥

વીરાય વીરભદ્રાય રક્ષદ્વીરાય શૂલિને ।
મહાદેવાય મહતે પશૂનાં પતયે નમઃ ॥ ૩૭॥

વીરાત્મને સુવિદ્યાય શ્રીકણ્ઠાય પિનાકિને ।
નમોઽનન્તાય સૂક્ષ્માય નમસ્તે મૃત્યુમન્યવે ॥ ૩૮॥

પરાય પરમેશાય પરાત્પરતરાય તે ।
પરાત્પરાય વિભવે નમસ્તે વિશ્વમૂર્તયે ॥ ૩૯॥

નમો વિષ્ણુકલત્રાય વિષ્ણુક્ષેત્રાય ભાનવે ।
ભૈરવાય શરણ્યાય ત્ર્યમ્બકાય વિહારિણે ॥ ૨.૪૧.૪૦॥

મૃત્યુઞ્જયાય શોકાય ત્રિગુણાય ગુણાત્મને ।
ચન્દ્રસૂર્યાગ્નિનેત્રાય સર્વકારણસેતવે ॥ ૪૧॥

ભવતા હિ જગત્સર્વં વ્યાપ્તં સ્વેનૈવ તેજસા ।
પરબ્રહ્મ નિર્વિકારી ચિદાનન્દઃ પ્રકાશવાન્ ॥ ૪૨॥

બ્રહ્મવિષ્ણ્વિન્દ્રચન્દ્રાદિપ્રમુખાસ્સકલાસ્સુરાઃ ।
મુનયશ્ચાપરે ત્વત્તસ્સમ્પ્રસૂતા મહેશ્વર ॥ ૪૩॥

યતો બિભર્ષિ સકલં વિભજ્ય તનુમષ્ટધા ।
અષ્ટમૂર્તિરિતીશશ્ચ ત્વમાદ્યઃ કરુણામયઃ ॥ ૪૪॥

ત્વદ્ભયાદ્વાતિ વાતોઽયં દહત્યગ્નિર્ભયાત્તવ ।
સૂર્યસ્તપતિ તે ભીત્યા મૃત્યુર્ધાવતિ સર્વતઃ ॥ ૪૫॥

દયાસિન્ધો મહેશાન પ્રસીદ પરમેશ્વર ।
રક્ષ રક્ષ સદૈવાસ્માન્ યસ્માન્નષ્ટાન્ વિચેતસઃ ॥ ૪૬॥

રક્ષિતાઃ સતતં નાથ ત્વયૈવ કરુણાનિધે ।
નાનાપદ્ભ્યો વયં શમ્ભો તથૈવાદ્ય પ્રપાહિ નઃ ॥ ૪૭॥

યજ્ઞસ્યોદ્ધરણં નાથ કુરુ શીઘ્રં પ્રસાદકૃત્ ।
અસમાપ્તસ્ય દુર્ગેશ દક્ષસ્ય ચ પ્રજાપતેઃ ॥ ૪૮॥

ભગોઽક્ષિણી પ્રપદ્યેત યજમાનશ્ચ જીવતુ ।
પૂષ્ણો દન્તાશ્ચ રોહન્તુ ભૃગોઃ શ્મશ્રૂણિ પૂર્વવત્ ॥ ૪૯॥

ભવતાનુગ્રહીતાનાં દેવાદીનાં ચ સર્વશઃ ।
આરોગ્યં ભગ્નગાત્રાણાં શઙ્કર ત્વાયુધાશ્મભિઃ ॥ ૨.૪૧.૫૦॥

પૂર્ણભાગોઽસ્તુ તે નાથાવશિષ્ટેઽધ્વરકર્મણિ ।
રુદ્રભાગેન યજ્ઞસ્તે કલ્પિતો નાન્યથા ક્વચિત્ ॥ ૫૧॥

ઇત્યુક્ત્વા સપ્રજેશશ્ચ રમેશશ્ચ કૃતાઞ્જલિઃ ।

દણ્ડવત્પતિતો ભૂમૌ ક્ષમાપયિતુમુદ્યતઃ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયામ્ ।
દ્વિતીયે સતીખણ્ડે દેવસ્તુતિવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૪૧॥

શિવપુરાણ । રુદ્રસંહિતા । સતીખણ્ડ । અધ્યાય ૪૧/૧-૪૭॥

shivapurANa . rudrasaMhitA . satIkhaNDa . adhyAya 41/1-47..

Proofread by PSA Easwaran

---

*Vishnvadikritam Shiva Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*